# सूत्रार्थ संस्पर्शि अध्यासभाष्यम्

**डॉ. जानकीशरणः**

सर्वमेव दर्शनं शास्त्रं वा चतुर्व्यूहमिति प्रसिद्धिरस्ति। यथा वैद्यशास्त्रं रोगः, तन्निदानं, तन्निवृत्त्युपायः, तन्निवृत्तौ स्वस्थता चेति चतुर्व्यूहे स्थितम्। तथैव सर्वमपि दर्शनं चतुर्व्यूहम् । सर्वमपि हितशासके दर्शने अवश्यम् इमे चत्वारः व्यूहाः भवन्ति । तर्हि दुःखम्, तन्निदानम्, तन्निवृत्त्युपायः, तन्निवृत्तौ स्वस्थता इति इमे चत्वारः अंशाः भवन्ति। इयं स्वस्थता दर्शनेषु मोक्षः तत्त्वज्ञानम्, सम्यज्ज्ञानम्, तत्त्वसाक्षात्कारः, परमज्ञानम्, विज्ञानम्, विवेकख्यातिः इत्यादिभिः शब्दैः व्यपदिश्यते। तदर्थमेव सर्वे दार्शनिकाः यतमानाः दृश्यन्ते। तत्र प्रथमः व्यूहः दुःखम् इति। इदं दुःखं न परिचायनीयं कस्यचित्। यतो हि सर्वः कदाचित् सर्वदा वा दुःखम् अनुभवत्येव। यः कदाचित् दुःखम् अनुभवति स लौकिकः इति कथ्यते। यः सर्वदा दुःखम् अनुभवति स विवेकी इति तु आश्चर्यम्।